No. १३५४ क

Title यन्त्रसंस्कार पद्धतिः

Author

Extent ३ पत्र Age

Subject तन्त्र

यं० १

ॐश्रीगणेशायनमः अथयंत्रसंस्कारः कामेश्वरतंत्रे भैरवउवाच चक्रभेदं म
हादेवत्वत्प्रसादान्मयाश्रुतं इदानींश्रोतुमिच्छामिप्रतिष्ठाकर्मनिर्णयं श्रीशं
करउवाच शृणुदेविमहाभागेजगत्कारिणिकौलिनि तस्यास्थापनकर्मांग
सर्वंतत्रैवविनिर्णयं स्नात्वासंकल्पयेन्मंत्री गुरोरर्चनमाचरेत् पंचगव्येनततःक्षा
लाशिवमंत्रेणमंत्रितं तत्रचक्रंलिपेन्मंत्रीप्रणवेनसमाकुलं उद्धृत्यचततश्च
क्रंस्थापयेत्स्वर्णपात्रके पंचामृतेनदुग्धेनशीतलेनजलेनच चंदनेनसुगंधेन
कस्तूरीकुंकुमेनच पयोदधिघृतक्षौद्रशर्कराभिरनुक्रमात् ततोभूपांतैःअ
र्घ्यांत्यचामृतविधिंबुधः हाटकैःकलशैर्देवीमष्टभिर्वारिपूरितैः काषायज
लसंपन्नैःकारयेत्स्नानमुत्तमं ततस्तीर्थजलैनैवमूलेनप्रणवेनच स्नानं
समाप्यतांदेविस्थापयेत्स्वर्णपीठके यंत्रराजायविद्महेमहायंत्रायधीमहि॥

तन्नो यंत्रः प्रचोदयात् स्पृष्ट्वा यंत्रं कुशाग्रेण गायत्र्या चाभिमंत्रयेत् अष्टोत्तरशतं दे
विदेवताभावसिद्धये आत्मशुद्धिं ततः कृत्वा षडंगैर्देवतां यजेत् तत्रावाह्य म
हादेवीं जीवन्यासं च कारयेत् उपचारैः षोडशभिर्महामुद्रादिभिः सदा फलतां
बूलनैवेद्यैर्देवीं तत्र समर्चयेत् पट्टसूत्रादिकं दद्यादात्महितेरतः ततो जपेत्स
हस्रं च सकलेप्सितसिद्धये बलिदानं ततः कुर्यात्प्रणमेच्चक्रराजकं अष्टोत्त
रशतं हुत्वा संपाताज्यं विनिःक्षिपेत् अष्टोत्तरशतं होमम् आज्यधान्यतिलेन च
मूलमंत्रं समुच्चार्य मंत्री मंत्रागमाचरेत् होमकर्मण्यशक्तश्चेद्द्विगुणं जपमा
चरेत् धेनुमेकां समानीय स्वर्णशृंगाद्यलंकृतां गुरवे दक्षिणां दद्यात् ततो दे
व्या विसर्जनं अथात्र प्रयोगः कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं संकल्पं कु
र्यात् ओं अद्येत्यादि अमुकगोत्रश्री अमुकदेवशर्मा अमुकदेवतायाः पूजार्थं

यं॰ अमुकयंत्रसंस्कारमहंकरिष्ये इतिसंकल्पः पंचगव्यमानीयह्रौंमितिमंत्रे
प्र॰ णाष्टोत्तरशतमभिमंत्र्य प्रणवेनमंत्रेतत्रनिःक्षिपेत् ततः उत्तोल्यपात्रेस्थाप
२ येत् ततःशीतलचंदनगंधकस्तूरीकुंकुमैः स्नापयित्वा पंचामृतमानीय
2 ह्रौं इतिमंत्रेणपूर्ववत् शोधयित्वास्थापयेत् ततःक्रमः प्रथमंक्षीरेणस्नाप
यित्वा पुनर्जलेनस्नापयित्वा धूपंदद्यात् एवंदध्नाघृतेनमधुनाशर्करयाच
ततोऽष्टभिःकलशैःकुंकुमगोरोचनाचंदनमिश्रितैस्तोयैःस्नापयेत् सर्व
त्रस्नानेतुमूलमंत्रेण ततोयंत्रमुत्तोल्यकुशाग्रेणयंत्रंस्पृष्ट्वा यंत्रराजायवि
द्महे महायंत्रायधीमहि तन्नोयंत्रःप्रचोदयात् इतिअष्टोत्तरशतमभिमंत्र्य
प्राणप्रतिष्ठांकुर्यात् अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्माविष्णुमहेश्वराऋ
षयः ऋग्यजुःसामानिछंदांसिचैतन्यंदेवता प्राणप्रतिष्ठायांविनियोगः ॥

आं ह्रीं क्रों यं रं लं वं शं षं सं हं हौं हंसः अमुकदेवतायाः प्राणा इह प्राणाः एवं
आं ह्रीं क्रों यं रं लं वं शं षं सं हं हौं हंसः अमुकदेवतायाः जीव इह स्थितः एवं आं
ह्रीं क्रों यं रं लं वं शं षं सं हं · हौं हंसः अमुकदेवतायाः सर्वेन्द्रियाणि इह स्थिता
नि एवं आं ह्रीं क्रों यं रं लं वं शं षं सं हं हौं हंसः अमुकदेवतायाः वाङ्मनश्चक्षुश्श्रो
त्रघ्राण प्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्राणान् प्रतिष्ठाप्य तत्र
प्रकृतदेवतामावाह्य षोडशोपचारादिना संपूज्य पंचोपचारैर्वा पूजयेत् ततः
पट्टसूत्रादिकं दत्वा अष्टोत्तरसहस्रं मंत्रं वा जपेत् शक्त्या बलिं दद्यात् ततः
अष्टोत्तरशतहोमं कृत्वा पूर्णाहुतिं संपातं दद्यात् होमासामर्थ्ये द्विगुणजपः
कार्यः ततो दक्षिणां दद्यात् अच्छिद्रावधारणं कुर्य्यात् इति यंत्रसंस्कारपद्ध
तिः संपूर्णम् समाप्तम् शुभम्

३

3